# shrI shyAmalAsahasranAmastotram

# શ્રી શ્યામલાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shyAmalAsahasranAmastotram

File name : shyAmalAsahasranAmastotra.itx

Category : sahasranAma, devii, pArvatI, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : DPD, Alex

Proofread by : DPD, NA

Description-comments : See corresponding nAmAvalI

Source : Saubhagyalaxmikalpa, bhagavatistutimanjari

Acknowledge-Permission: Mahaperiaval Trust

Latest update : February 1, 2015, April 2, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2022

*sanskritdocuments.org*

# શ્રી શ્યામલાસહસ્રનામસ્તોત્રમ્

નામસારસ્તવઃ

સર્વશૃઙ્ગારશોભાઢ્યાં તુઙ્ગપીનપયોધરામ્ ।
ગઙ્ગાધરપ્રિયાં દેવીં માતઙ્ગીં નૌમિ સન્તતમ્ ॥ ૧॥

શ્રીમદ્વૈકુણ્ઠનિલયં શ્રીપતિં સિદ્ધસેવિતમ્ ।
કદાચિત્સ્વપ્રિયં લક્ષ્મીર્નારાયણમપૃચ્છત ॥ ૨॥

લક્ષ્મીરુવાચ

કિં જપ્યં પરમં નૃણાં ભોગમોક્ષફલપ્રદમ્ ।
સર્વવશ્યકરં ચૈવ સર્વૈશ્વર્યપ્રદાયકમ્ ॥ ૩॥

સર્વરક્ષાકરં ચૈવ સર્વત્ર વિજયપ્રદમ્ ।
બ્રહ્મજ્ઞાનપ્રદં પુંસાં તન્મે બ્રૂહિ જનાર્દન ॥ ૪॥

ભગવાનુવાચ

નામસારસ્તવં પુણ્યં પઠેન્નિત્યં પ્રયત્નતઃ ।
તેન પ્રીતા શ્યામલામ્બા ત્વદ્વશં કુરુતે જગત્ ॥ ૫॥

તન્ત્રેષુ લલિતાદીનાં શક્તીનાં નામકોશતઃ ।
સારમુદ્ધૃત્ય રચિતો નામસારસ્તવો હ્યયમ્ ॥ ૬॥

નામસારસ્તવં મહ્યં દત્તવાન્ પરમેશ્વરઃ ।
તવ નામસહસ્રં તત્ શ્યામલાયા વદામ્યહમ્ ॥ ૭॥

વિનિયોગઃ ॥

અસ્ય શ્રીશ્યામલાપરમેશ્વરીનામસાહસ્રસ્તોત્રમાલા મન્ત્રસ્ય,
સદાશિવ ઋષિઃ । અનુષ્ટુપ્છન્દઃ ।
શ્રીરાજરાજેશ્વરી શ્યામલા પરમેશ્વરી દેવતા ।
ચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થે નામપારાયણે વિનિયોગઃ ।

ધ્યાનમ્ ॥

ધ્યાયેઽહં રત્નપીઠે શુકકલપઠિતં શ‍ૃણ્વતીં શ્યામગાત્રીં
ન્યસ્તૈકાઙ્ઘ્રીં સરોજે શશિશકલધરાં વલ્લકીં વાદયન્તીમ્ ।
કલ્હારાબદ્ધમૌલિં નિયમિતલસચ્ચૂલિકાં રક્તવસ્ત્રાં
માતઙ્ગીં ભૂષિતાઙ્ગીં મધુમદમુદિતાં ચિત્રકોદ્ભાસિફાલામ્ ॥

પઞ્ચપૂજા ।

અથ સહસ્રનામસ્તોત્રમ્ ।

ૐ ।
સૌભાગ્યલક્ષ્મીઃ સૌન્દર્યનિધિઃ સમરસપ્રિયા ।
સર્વકલ્યાણનિલયા સર્વેશી સર્વમઙ્ગલા ॥ ૧॥

સર્વવશ્યકરી સર્વા સર્વમઙ્ગલદાયિની ।
સર્વવિદ્યાદાનદક્ષા સઙ્ગીતોપનિષત્પ્રિયા ॥ ૨॥

સર્વભૂતહૃદાવાસા સર્વગીર્વાણપૂજિતા ।
સમૃદ્ધા સઙ્ગમુદિતા સર્વલોકૈકસંશ્રયા ॥ ૩॥

સપ્તકોટિમહામન્ત્રસ્વરૂપા સર્વસાક્ષિણી ।
સર્વાઙ્ગસુન્દરી સર્વગતા સત્યસ્વરૂપિણી ॥ ૪॥

સમા સમયસંવેદ્યા સમયજ્ઞા સદાશિવા ।
સઙ્ગીતરસિકા સર્વકલામયશુકપ્રિયા ॥ ૫॥

ચન્દનાલેપદિગ્ધાઙ્ગી સચ્ચિદાનન્દરૂપિણી ।
કદમ્બવાટીનિલયા કમલાકાન્તસેવિતા ॥ ૬॥

કટાક્ષોત્પન્નકન્દર્પા કટાક્ષિતમહેશ્વરા ।
કલ્યાણી કમલાસેવ્યા કલ્યાણાચલવાસિની ॥ ૭॥

કાન્તા કન્દર્પજનની કરુણારસસાગરા ।
કલિદોષહરા કામ્યા કામદા કામવર્ધિની ॥ ૮॥

કદમ્બકલિકોત્તંસા કદમ્બકુસુમપ્રિયા ।
કદમ્બમૂલરસિકા કામાક્ષી કમલાનના ॥ ૯॥

કમ્બુકણ્ઠી કલાલાપા કમલાસનપૂજિતા ।
કાત્યાયની કેલિપરા કમલાક્ષસહોદરી ॥ ૧૦॥

કમલાક્ષી કલારૂપા કોકાકારકુચદ્વયા ।
કોકિલા કોકિલારાવા કુમારજનની શિવા ॥ ૧૧॥

સર્વજ્ઞા સન્તતોન્મત્તા સર્વૈશ્વર્યપ્રદાયિની ।
સુધાપ્રિયા સુરારાધ્યા સુકેશી સુરસુન્દરી ॥ ૧૨॥

શોભના શુભદા શુદ્ધા શુદ્ધચિત્તૈકવાસિની ।
વેદવેદ્યા વેદમયી વિદ્યાધરગણાર્ચિતા ॥ ૧૩॥

વેદાન્તસારા વિશ્વેશી વિશ્વરૂપા વિરૂપિણી ।
વિરૂપાક્ષપ્રિયા વિદ્યા વિન્ધ્યાચલનિવાસિની ॥ ૧૪॥

વીણાવાદવિનોદજ્ઞા વીણાગાનવિશારદા ।
વીણાવતી બિન્દુરૂપા બ્રહ્માણી બ્રહ્મરૂપિણી ॥ ૧૫॥

પાર્વતી પરમાઽચિન્ત્યા પરાશક્તિઃ પરાત્પરા ।
પરાનન્દા પરેશાની પરવિદ્યા પરાપરા ॥ ૧૬॥

ભક્તપ્રિયા ભક્તિગમ્યા ભક્તાનાં પરમા ગતિઃ ।
ભવ્યા ભવપ્રિયા ભીરુર્ભવસાગરતારિણી ॥ ૧૭॥

ભયઘ્ની ભાવુકા ભવ્યા ભામિની ભક્તપાલિની ।
ભેદશૂન્યા ભેદહન્ત્રી ભાવના મુનિભાવિતા ॥ ૧૮॥

માયા મહેશ્વરી માન્યા માતઙ્ગી મલયાલયા ।
મહનીયા મદોન્મત્તા મન્ત્રિણી મન્ત્રનાયિકા ॥ ૧૯॥

મહાઽઽનન્દા મનોગમ્યા મતઙ્ગકુલમણ્ડના ।
મનોજ્ઞા માનિની માધ્વી સિન્ધુમધ્યકૃતાલયા ॥ ૨૦॥

મધુપ્રીતા નીલકચા માધ્વીરસમદાલસા ।
પૂર્ણચન્દ્રાભવદના પૂર્ણા પુણ્યફલપ્રદા ॥ ૨૧॥

પુલોમજાર્ચિતા પૂજ્યા પુરુષાર્થપ્રદાયિની ।
નારાયણી નાદરૂપા નાદબ્રહ્મસ્વરૂપિણી ॥ ૨૨॥

નિત્યા નવનવાકારા નિત્યાનન્દા નિરાકુલા ।
નિટિલાક્ષપ્રિયા નેત્રી નીલેન્દીવરલોચના ॥ ૨૩॥

તમાલકોમલાકારા તરુણી તનુમધ્યમા ।
તટિત્પિશઙ્ગવસના તટિત્કોટિસમદ્યુતિઃ ॥ ૨૪॥

મધુરા મઙ્ગલા મેધ્યા મધુપાનપ્રિયા સખી ।
ચિત્કલા ચારુવદના સુખરૂપા સુખપ્રદા ॥ ૨૫॥

કૂટસ્થા કૌલિની કૂર્મપીઠસ્થા કુટિલાલકા ।
શાન્તા શાન્તિમતી શાન્તિઃ શ્યામલા શ્યામલાકૃતિઃ ॥ ૨૬॥

શઙ્ખિની શઙ્કરી શૈવી શઙ્ખકુણ્ડલમણ્ડિતા ।
કુન્દદન્તા કોમલાઙ્ગી કુમારી કુલયોગિની ॥ ૨૭॥

નિર્ગર્ભયોગિનીસેવ્યા નિરન્તરરતિપ્રિયા ।
શિવદૂતી શિવકરી જટિલા જગદાશ્રયા ॥ । ૨૮॥

શામ્ભવી યોગિનિલયા પરચૈતન્યરૂપિણી ।
દહરાકાશનિલયા દણ્ડિનીપરિપૂજિતા ॥ ૨૯॥

સમ્પત્કરીગજારૂઢા સાન્દ્રાનન્દા સુરેશ્વરી ।
ચમ્પકોદ્ભાસિતકચા ચન્દ્રશેખરવલ્લભા ॥ ૩૦॥

ચારુરૂપા ચારુદન્તી ચન્દ્રિકા શમ્ભુમોહિની ।
વિમલા વિદુષી વાણી કમલા કમલાસના ॥ ૩૧॥

કરુણાપૂર્ણહૃદયા કામેશી કમ્બુકન્ધરા ।
રાજરાજેશ્વરી રાજમાતઙ્ગી રાજવલ્લભા ॥ ૩૨॥

સચિવા સચિવેશાની સચિવત્વપ્રદાયિની ।
પઞ્ચબાણાર્ચિતા બાલા પઞ્ચમી પરદેવતા ॥ ૩૩॥

ઉમા મહેશ્વરી ગૌરી સઙ્ગીતજ્ઞા સરસ્વતી ।
કવિપ્રિયા કાવ્યકલા કલૌ સિદ્ધિપ્રદાયિની ॥ ૩૪॥

લલિતામન્ત્રિણી રમ્યા લલિતારાજ્યપાલિની ।
લલિતાસેવનપરા લલિતાજ્ઞાવશંવદા ॥ ૩૫॥

લલિતાકાર્યચતુરા લલિતાભક્તપાલિની ।
લલિતાર્ધાસનારૂઢા લાવણ્યરસશેવધિઃ ॥ ૩૬॥

રઞ્જની લાલિતશુકા લસચ્ચૂલીવરાન્વિતા ।
રાગિણી રમણી રામા રતી રતિસુખપ્રદા ॥ ૩૭॥

ભોગદા ભોગ્યદા ભૂમિપ્રદા ભૂષણશાલિની ।

પુણ્યલભ્યા પુણ્યકીર્તિઃ પુરન્દરપુરેશ્વરી ॥ ૩૮॥

ભૂમાઽઽનન્દા ભૂતિકરી ક્લીઙ્કારી ક્લિન્નરૂપિણી ।
ભાનુમણ્ડલમધ્યસ્થા ભામિની ભારતી ધૃતિઃ ॥ ૩૯॥

નારાયણાર્ચિતા નાથા નાદિની નાદરૂપિણી ।
પઞ્ચકોણાસ્થિતા લક્ષ્મીઃ પુરાણી પુરરૂપિણી ॥ ૪૦॥

ચક્રસ્થિતા ચક્રરૂપા ચક્રિણી ચક્રનાયિકા ।
ષટ્ચક્રમણ્ડલાન્તઃસ્થા બ્રહ્મચક્રનિવાસિની ॥ ૪૧॥

અન્તરભ્યર્ચનપ્રીતા બહિરર્ચનલોલુપા ।
પઞ્ચાશત્પીઠમધ્યસ્થા માતૃકાવર્ણરૂપિણી ॥ ૪૨॥

મહાદેવી મહાશક્તિઃ મહામાયા મહામતિઃ ।
મહારૂપા મહાદીપ્તિઃ મહાલાવણ્યશાલિની ॥ ૪૩॥

માહેન્દ્રી મદિરાદૃપ્તા મદિરાસિન્ધુવાસિની ।
મદિરામોદવદના મદિરાપાનમન્થરા ॥ ૪૪॥

દુરિતઘ્ની દુઃખહન્ત્રી દૂતી દૂતરતિપ્રિયા ।
વીરસેવ્યા વિઘ્નહરા યોગિની ગણસેવિતા ॥ ૪૫॥

નિજવીણારવાનન્દનિમીલિતવિલોચના ।
વજ્રેશ્વરી વશ્યકરી સર્વચિત્તવિમોહિની ॥ ૪૬॥

શબરી શમ્બરારાધ્યા શામ્બરી સામસંસ્તુતા ।
ત્રિપુરામન્ત્રજપિની ત્રિપુરાર્ચનતત્પરા ॥ ૪૭॥

ત્રિલોકેશી ત્રયીમાતા ત્રિમૂર્તિસ્ત્રિદિવેશ્વરી ।
ઐઙ્કારી સર્વજનની સૌઃકારી સંવિદીશ્વરી ॥ ૪૮॥

બોધા બોધકરી બોધ્યા બુધારાધ્યા પુરાતની ।
ભણ્ડસોદરસંહર્ત્રી ભણ્ડસૈન્યવિનાશિની ॥ ૪૯॥

ગેયચક્રરથારૂઢા ગુરુમૂર્તિઃ કુલાઙ્ગના ।
ગાન્ધર્વશાસ્ત્રમર્મજ્ઞા ગન્ધર્વગણપૂજિતા ॥ ૫૦॥

જગન્માતા જયકરી જનની જનદેવતા ।
શિવારાધ્યા શિવાર્ધાઙ્ગી શિઞ્જન્મઞ્જીરમણ્ડિતા ॥ ૫૧॥

સર્વાત્મિકા ઋષીકેશી સર્વપાપવિનાશિની ।
સર્વરોગહરા સાધ્યા ધર્મિણી ધર્મરૂપિણી ॥ ૫૨॥

આચારલભ્યા સ્વાચારા ખેચરી યોનિરૂપિણી ।
પતિવ્રતા પાશહન્ત્રી પરમાર્થસ્વરૂપિણી ॥ ૫૩॥

પણ્ડિતા પરિવારાઢ્યા પાષણ્ડમતભઞ્જની ।
શ્રીકરી શ્રીમતી દેવી બિન્દુનાદસ્વરૂપિણી ॥ ૫૪॥

અપર્ણા હિમવત્પુત્રી દુર્ગા દુર્ગતિહારિણી ।
વ્યાલોલશઙ્ખાતાટઙ્કા વિલસદ્ગણ્ડપાલિકા ॥ ૫૫॥

સુધામધુરસાલાપા સિન્દૂરતિલકોજ્જ્વલા ।
અલક્તકારક્તપાદા નન્દનોદ્યાનવાસિની ॥ ૫૬॥

વાસન્તકુસુમાપીડા વસન્તસમયપ્રિયા ।
ધ્યાનનિષ્ઠા ધ્યાનગમ્યા ધ્યેયા ધ્યાનસ્વરૂપિણી ॥ ૫૭॥

દારિદ્ર્યહન્ત્રી દૌર્ભાગ્યશમની દાનવાન્તકા ।
તીર્થરૂપા ત્રિનયના તુરીયા દોષવર્જિતા ॥ ૫૮॥

મેધાપ્રદાયિની મેધ્યા મેદિની મદશાલિની ।
મધુકૈટભસંહર્ત્રી માધવી માધવપ્રિયા ॥ ૫૯॥

મહિલા મહિમાસારા શર્વાણી શર્મદાયિની ।
રુદ્રાણી રુચિરા રૌદ્રી રુક્મભૂષણભૂષિતા ॥ ૬૦॥

અમ્બિકા જગતાં ધાત્રી જટિની ધૂર્જટિપ્રિયા ।
સુક્ષ્મસ્વરૂપિણી સૌમ્યા સુરુચિઃ સુલભા શુભા ॥ ૬૧॥

વિપઞ્ચીકલનિક્કાણવિમોહિતજગત્ત્રયા ।
ભૈરવપ્રેમનિલયા ભૈરવી ભાસુરાકૃતિઃ ॥ ૬૨॥

પુષ્પિણી પુણ્યનિલયા પુણ્યશ્રવણકીર્તના ।
કુરુકુલ્લા કુણ્ડલિની વાગીશી નકુલેશ્વરી ॥ ૬૩॥

વામકેશી ગિરિસુતા વાર્તાલીપરિપૂજિતા ।
વારુણીમદરક્તાક્ષી વન્દારુવરદાયિની ॥ ૬૪॥

કટાક્ષસ્યન્દિકરુણા કન્દર્પમદવર્ધિની ।
દૂર્વાશ્યામા દુષ્ટહન્ત્રી દુષ્ટગ્રહવિભેદિની ॥ ૬૫॥

સર્વશત્રુક્ષયકરી સર્વસમ્પત્પ્રવર્ધિની ।
કબરીશોભિકલ્હારા કલશિઞ્જિતમેખલા ॥ ૬૬॥

મૃણાલીતુલ્વદોર્વલ્લી મૃડાની મૃત્યુવર્જિતા ।
મૃદુલા મૃત્યુસંહર્ત્રી મઞ્જુલા મઞ્જુભાષિણી ॥ ૬૭॥

કર્પૂરવીટીકબલા કમનીયકપોલભૂઃ ।
કર્પૂરક્ષોદદિગ્ધાઙ્ગી કર્ત્રી કારણવર્જિતા ॥ ૬૮॥

અનાદિનિધના ધાત્રી ધાત્રીધરકુલોદ્ભવા ।
સ્તોત્રપ્રિયા સ્તુતિમયી મોહિની મોહહારિણી ॥ ૬૯॥

જીવરૂપા જીવકારી જીવન્મુક્તિપ્રદાયિની ।
ભદ્રપીઠસ્થિતા ભદ્રા ભદ્રદા ભર્ગભામિની ॥ ૭૦॥

ભગાનન્દા ભગમયી ભગલિઙ્ગા ભગેશ્વરી ।
મત્તમાતઙ્ગગમના માતઙ્ગકુલમઞ્જરી ॥ ૭૧॥

રાજહંસગતી રાજ્ઞી રાજરાજ સમર્ચિતા ।
ભવાની પાવની કાલી દક્ષિણા દક્ષકન્યકા ॥ ૭૨॥

હવ્યવાહા હવિર્ભોક્ત્રી હારિણી દુઃખહારિણી ।
સંસારતારિણી સૌમ્યા સર્વેશી સમરપ્રયા ॥ ૭૩॥

સ્વપ્નવતી જાગરિણી સુષુપ્ત્રા વિશ્વરૂપિણી ।
તૈજસી પ્રાજ્ઞકલના ચેતના ચેતનાવતી ॥ ૭૪॥

ચિન્માત્રા ચિદ્ઘના ચેત્યા ચિચ્છાયા ચિત્સ્વરૂપિણી ।
નિવૃત્તિરૂપિણી શાન્તિઃ પ્રતિષ્ઠા નિત્યરૂપિણી ॥ ૭૫॥

વિદ્યારૂપા શાન્ત્યતીતા કલાપઞ્ચકરૂપિણી ।
હ્રીઙ્કારી હ્રીમતી હૃદ્યા હ્રીચ્છાયા હરિવાહના ॥ ૭૬॥

મૂલપ્રકૃતિરવ્યક્તા વ્યક્તાવ્યક્તવિનોદિની ।
યજ્ઞરૂપા યજ્ઞભોક્ત્રી યજ્ઞાઙ્ગી યજ્ઞરૂપિણી ॥ ૭૭॥

દીક્ષિતા ક્ષમણા ક્ષામા ક્ષિતિઃ ક્ષાન્તિઃ શ્રુતિઃ સ્મૃતિઃ ।
એકાઽનેકા કામકલા કલ્પા કાલસ્વરૂપિણી ॥ ૭૮॥

દક્ષા દાક્ષાયણી દીક્ષા દક્ષયજ્ઞવિનાશિની ।

ગાયત્રી ગગનાકારા ગીર્દેવી ગરુડાસના ॥ ૭૯॥

સાવિત્રી સકલાધ્યક્ષા બ્રહ્માણી બ્રાહ્મણપ્રિયા ।
જગન્નાથા જગન્મૂર્તિઃ જગન્મૃત્યુનિવારિણી ॥ ૮૦॥

દૃગ્રૂપા દૃશ્યનિલયા દ્રષ્ટ્રી મન્ત્રી ચિરન્તની ।
વિજ્ઞાત્રી વિપુલા વેદ્યા વૃદ્ધા વર્ષીયસી મહી ॥ ૮૧॥

આર્યા કુહરિણી ગુહ્યા ગૌરી ગૌતમપૂજિતા ।
નન્દિની નલિની નિત્યા નીતિર્નયવિશારદા ॥ ૮૨॥

ગતાગતજ્ઞા ગન્ધર્વી ગિરિજા ગર્વનાશિની ।
પ્રિયવ્રતા પ્રમા પ્રાણા પ્રમાણજ્ઞા પ્રિયંવદા ॥ ૮૩॥

અશરીરા શરીરસ્થા નામરૂપવિવર્જિતા ।
વર્ણાશ્રમવિભાગજ્ઞા વર્ણાશ્રમવિવર્જિતા ॥ ૮૪॥

નિત્યમુક્તા નિત્યતૃપ્તા નિર્લેપા નિરવગ્રહા ।
ઇચ્છાજ્ઞાનક્રિયાશક્તિઃ ઇન્દિરા બન્ધુરાકૃતિઃ ॥ ૮૫॥

મનોરથપ્રદા મુખ્યા માનિની માનવર્જિતા ।
નીરાગા નિરહઙ્કારા નિર્નાશા નિરુપપ્લવા ॥ ૮૬॥

વિચિત્રા ચિત્રચારિત્રા નિષ્કલા નિગમાલયા ।
બ્રહ્મવિદ્યા બ્રહ્મનાડી બન્ધહન્ત્રી બલિપ્રિયા ॥ ૮૭॥

સુલક્ષણા લક્ષણજ્ઞા સુન્દરભ્રૂલતાઞ્ચિતા ।
સુમિત્રા માલિની સીમા મુદ્રિણી મુદ્રિકાઞ્ચિતા ॥ ૮૮॥

રજસ્વલા રમ્યમૂર્તિર્જયા જન્મવિવર્જિતા ।
પદ્માલયા પદ્મપીઠા પદ્મિની પદ્મવર્ણિની ॥ ૮૯॥

વિશ્વમ્ભરા વિશ્વગર્ભા વિશ્વેશી વિશ્વતોમુખી ।
અદ્વિતીયા સહસ્રાક્ષી વિરાડ્રૂપા વિમોચિની ॥ ૯૦॥

સૂત્રરૂપા શાસ્ત્રકરી શાસ્ત્રજ્ઞા શસ્ત્રધારિણી ।
વેદવિદ્વેદકૃદ્વેદ્યા વિત્તજ્ઞા વિત્તશાલિની ॥ ૯૧॥

વિશદા વૈષ્ણવી બ્રાહ્મી વૈરિઞ્ચી વાક્પ્રદાયિની ।
વ્યાખ્યાત્રી વામના વૃદ્ધિઃ વિશ્વનાથા વિશારદા ॥ ૯૨॥

મુદ્રેશ્વરી મુણ્ડમાલા કાલી કઙ્કાલરૂપિણી ।
મહેશ્વરપ્રીતિકરી મહેશ્વર પતિવ્રતા ॥ ૯૩॥

બ્રહ્માણ્ડમાલિની બુધ્ધા મતઙ્ગમુનિપૂજિતા ।
ઈશ્વરી ચણ્ડિકા ચણ્ડી નિયન્ત્રી નિયમસ્થિતા ॥ ૯૪॥

સર્વાન્તર્યામિણી સેવ્યા સન્તતિઃ સન્તતિપ્રદા ।
તમાલપલ્લવશ્યામા તામ્રોષ્ઠી તાણ્ડવપ્રિયા ॥ ૯૫॥

નાટ્યલાસ્યકરી રમ્ભા નટરાજપ્રિયાઙ્ગના ।
અનઙ્ગરૂપાઽનઙ્ગશ્રીરનઙ્ગેશી વસુન્ધરા ॥ ૯૬॥

સામ્રાજ્યદાયિની સિધ્ધા સિધ્ધેશી સિધ્ધિદાયિની ।
સિધ્ધમાતા સિધ્ધપૂજ્યા સિધ્ધાર્થા વસુદાયિની ॥ ૯૭॥

ભક્તિમત્કલ્પલતિકા ભક્તિદા ભક્તવત્સલા ।
પઞ્ચશક્ત્યર્ચિતપદા પરમાત્મસ્વરૂપિણી ॥ ૯૮॥

અજ્ઞાનતિમિરજ્યોત્સ્ના નિત્યાહ્લાદા નિરઞ્જના ।
મુગ્ધા મુગ્ધસ્મિતા મૈત્રી મુગ્ધકેશી મધુપ્રિયા ॥ ૯૯॥

કલાપિની કામકલા કામકેલિઃ કલાવતી ।
અખણ્ડા નિરહઙ્કારા પ્રધાનપુરુષેશ્વરી ॥ ૧૦૦॥

રહઃપૂજ્યા રહઃકેલી રહઃસ્તુત્યા હરપ્રિયા ।
શરણ્યા ગહના ગુહ્યા ગુહાન્તઃસ્થા ગુહપ્રસૂ ॥ ૧૦૧॥

સ્વસંવેદ્યા સ્વપ્રકાશા સ્વાત્મસ્થા સ્વર્ગદાયિની ।
નિષ્પ્રપઞ્ચા નિરાધારા નિત્યાનિત્યસ્વરૂપિણી ॥ ૧૦૨॥

નર્મદા નર્તકી કીર્તિઃ નિષ્કામા નિષ્કલા કલા ।
અષ્ટમૂર્તિરમોઘોમા નન્દ્યાદિગણપૂજિતા ॥ ૧૦૩॥

યન્ત્રરૂપા તન્ત્રરૂપા મન્ત્રરૂપા મનોન્મની ।
શિવકામેશ્વરી દેવી ચિદ્રૂપા ચિત્તરઙ્ગિણી ॥ ૧૦૪॥

ચિત્સ્વરૂપા ચિત્પ્રકાશા ચિન્મૂર્તિશ્ચિન્મયી ચિતિઃ ।
મૂર્ખદૂરા મોહહન્ત્રી મુખ્યા ક્રોડમુખી સખી ॥ ૧૦૫॥

જ્ઞાનજ્ઞાતૃજ્ઞેયરૂપા વ્યોમાકારા વિલાસિની ।
વિમર્શરૂપિણી વશ્યા વિધાનજ્ઞા વિજૃમ્ભિતા ॥ ૧૦૬॥

કેતકીકુસુમાપીડા કસ્તૂરીતિલકોજ્જ્વલા ।
મૃગ્યા મૃગાક્ષી રસિકા મૃગનાભિસુગન્ધિની ॥ ૧૦૭॥

યક્ષકર્દમલિપ્તાઙ્ગી યક્ષિણી યક્ષપૂજિતા ।
લસન્માણિક્યકટકા કેયૂરોજ્જ્વલદોર્લતા ॥ ૧૦૮॥

સિન્દૂરરાજત્સીમન્તા સુભ્રૂવલ્લી સુનાસિકા ।
કૈવલ્યદા કાન્તિમતી કઠોરકુચમણ્ડલા ॥ ૧૦૯॥

તલોદરી તમોહન્ત્રી ત્રયસ્ત્રિંશત્સુરાત્મિકા ।
સ્વયમ્ભૂઃ કુસુમામોદા સ્વયમ્ભુકુસુમપ્રિયા ॥ ૧૧૦॥

સ્વાધ્યાયિની સુખારાધ્યા વીરશ્રીર્વીરપૂજિતા ।
દ્રાવિણી વિદ્રુમાભોષ્ઠી વેગિની વિષ્ણુવલ્લભા ॥ ૧૧૧॥

હાલામદા લસદ્વાણી લોલા લીલાવતી રતિઃ ।
લોપામુદ્રાર્ચિતા લક્ષ્મીરહલ્યાપરિપૂજિતા ॥ ૧૧૨॥

આબ્રહ્મકીટજનની કૈલાસગિરિવાસિની ।
નિધીશ્વરી નિરાતઙ્કા નિષ્કલઙ્કા જગન્મયી ॥ ૧૧૩॥

આદિલક્ષ્મીરનન્તશ્રીરચ્યુતા તત્ત્વરૂપિણી ।
નામજાત્યાદિરહિતા નરનારાયણાર્ચિતા ॥ ૧૧૪॥

ગુહ્યોપનિષદુદ્ગીતા લક્ષ્મીવાણીનિષેવિતા ।
મતઙ્ગવરદા સિદ્ધા મહાયોગીશ્વરી ગુરુઃ ॥ ૧૧૫॥

ગુરુપ્રિયા કુલારાધ્યા કુલસઙ્કેતપાલિની ।
ચિચ્ચન્દ્રમણ્ડલાન્તઃ સ્થા ચિદાકાશસ્વરૂપિણી ॥ ૧૧૬॥

અનઙ્ગશાસ્ત્રતત્ત્વજ્ઞા નાનાવિધરસપ્રિયા ।
નિર્મલા નિરવદ્યાઙ્ગી નીતિજ્ઞા નીતિરૂપિણી ॥ ૧૧૭॥

વ્યાપિની વિબુધશ્રેષ્ઠા કુલશૈલકુમારિકા ।
વિષ્ણુપ્રસૂર્વીરમાતા નાસામણિવિરાજિતા ॥ ૧૧૮॥

નાયિકા નગરીસંસ્થા નિત્યતુષ્ટા નિતમ્બિની ।
પઞ્ચબ્રહ્મમયી પ્રાઞ્ચી બ્રહ્માત્મૈક્યસ્વરૂપિણી ॥ ૧૧૯॥

સર્વોપનિષદુદ્ગીતા સર્વાનુગ્રહકારિણી ।

પવિત્રા પાવના પૂતા પરમાત્મસ્વરૂપિણી ॥ ૧૨૦॥

સૂર્યેન્દુવહ્નિનયના સૂર્યમણ્ડલમધ્યગા ।
ગાયત્રી ગાત્રરહિતા સુગુણા ગુણવર્જિતા ॥ ૧૨૧॥

રક્ષાકરી રમ્યરુપા સાત્વિકા સત્ત્વદાયિની ।
વિશ્વાતીતા વ્યોમરૂપા સદાઽર્ચનજપપ્રિયા ॥ ૧૨૨॥

આત્મભૂરજિતા જિષ્ણુરજા સ્વાહા સ્વધા સુધા ।
નન્દિતાશેષભુવના નામસઙ્કીર્તનપ્રિયા ॥ ૧૨૩॥

ગુરુમૂર્તિર્ગુરુમયી ગુરુપાદાર્ચનપ્રિયા ।
ગોબ્રાહ્મણાત્મિકા ગુર્વી નીલકણ્ઠી નિરામયા ॥ ૧૨૪॥

માનવી મન્ત્રજનની મહાભૈરવપૂજિતા ।
નિત્યોત્સવા નિત્યપુષ્ટા શ્યામા યૌવનશાલિની ॥ ૧૨૫॥

મહનીયા મહામૂર્તિર્મહતી સૌખ્યસન્તતિઃ ।
પૂર્ણોદરી હવિર્ધાત્રી ગણારાધ્યા ગણેશ્વરી ॥ ૧૨૬॥

ગાયના ગર્વરહિતા સ્વેદબિન્દૂલ્લસન્મુખી ।
તુઙ્ગસ્તની તુલાશૂન્યા કન્યા કમલવાસિની ॥ ૧૨૭॥

શૃઙ્ગારિણી શ્રીઃ શ્રીવિદ્યા શ્રીપ્રદા શ્રીનિવાસિની ।
ત્રૈલોક્યસુન્દરી બાલા ત્રૈલોક્યજનની સુધીઃ ॥ ૧૨૮॥

પઞ્ચક્લેશહરા પાશધારિણી પશુમોચની ।
પાષણ્ડહન્ત્રી પાપઘ્ની પાર્થિવશ્રીકરી ધૃતિઃ ॥ ૧૨૯॥

નિરપાયા દુરાપા યા સુલભા શોભનાકૃતિઃ ।
મહાબલા ભગવતી ભવરોગનિવારિણી ॥ ૧૩૦॥

ભૈરવાષ્ટકસંસેવ્યા બ્રાહ્મ્યાદિપરિવારિતા ।
વામાદિશક્તિસહિતા વારુણીમદવિહ્વલા ॥ ૧૩૧॥

વરિષ્ઠાવશ્યદા વશ્યા ભક્તાર્તિદમના શિવા ।
વૈરાગ્યજનની જ્ઞાનદાયિની જ્ઞાનવિગ્રહા ॥ ૧૩૨॥

સર્વદોષવિનિર્મુક્તા શઙ્કરાર્ધશરીરિણી ।
સર્વેશ્વરપ્રિયતમા સ્વયંજ્યોતિસ્સ્વરૂપિણી ॥ ૧૩૩॥

ક્ષીરસાગરમધ્યસ્થા મહાભુજગશાયિની ।
કામધેનુર્બૃહદ્ગર્ભા યોગનિદ્રા યુગન્ધરા ॥ ૧૩૪॥

મહેન્દ્રોપેન્દ્રજનની માતઙ્ગકુલસમ્ભવા ।
મતઙ્ગજાતિસમ્પૂજ્યા મતઙ્ગકુલદેવતા ॥ ૧૩૫॥

ગુહ્યવિદ્યા વશ્યવિદ્યા સિદ્ધવિદ્યા શિવાઙ્ગના ।
સુમઙ્ગલા રત્નગર્ભા સૂર્યમાતા સુધાશના ॥ ૧૩૬॥

ખડ્ગમણ્ડલ સમ્પૂજ્યા સાલગ્રામનિવાસિની ।
દુર્જયા દુષ્ટદમના દુર્નિરીક્ષ્યા દુરત્યયા ॥ ૧૩૭॥

શઙ્ખચક્રગદાહસ્તા વિષ્ણુશક્તિર્વિમોહિની ।
યોગમાતા યોગગમ્યા યોગનિષ્ઠા સુધાસ્રવા ॥ ૧૩૮॥

સમાધિનિષ્ઠૈઃ સંવેદ્યા સર્વભેદવિવર્જિતા ।
સાધારણા સરોજાક્ષી સર્વજ્ઞા સર્વસાક્ષિણી ॥ ૧૩૯॥

મહાશક્તિર્મહોદારા મહામઙ્ગલદેવતા ।
કલૌ કૃતાવતરણા કલિકલ્મષનાશિની ॥ ૧૪૦॥

સર્વદા સર્વજનની નિરીશા સર્વતોમુખી ।
સુગૂઢા સર્વતો ભદ્રા સુસ્થિતા સ્થાણુવલ્લભા ॥ ૧૪૧॥

ચરાચરજગદ્રૂપા ચેતનાચેતનાકૃતિઃ ।
મહેશ્વર પ્રાણનાડી મહાભૈરવમોહિની ॥ ૧૪૨॥

મઞ્જુલા યૌવનોન્મત્તા મહાપાતકનાશિની ।
મહાનુભાવા માહેન્દ્રી મહામરકતપ્રભા ॥ ૧૪૩॥

સર્વશક્ત્યાસના શક્તિર્નિરાભાસા નિરિન્દ્રિયા ।
સમસ્તદેવતામૂર્તિઃ સમસ્તસમયાર્ચિતા ॥ ૧૪૪॥

સુવર્ચલા વિયન્મૂર્તિઃ પુષ્કલા નિત્યપુષ્પિણી ।
નીલોત્પલદલશ્યામા મહાપ્રલયસાક્ષિણી ॥ ૧૪૫॥

સઙ્કલ્પસિદ્ધા સઙ્ગીતરસિકા રસદાયિની ।
અભિન્ના બ્રહ્મજનની કાલક્રમવિવર્જિતા ॥ ૧૪૬॥

અજપા જાડ્યરહિતા પ્રસન્ના ભગવત્પ્રિયા ।
ઇન્દિરા જગતીકન્દા સચ્ચિદાનન્દકન્દલી ॥

શ્રીચક્રનિલયા દેવી શ્રીવિદ્યા શ્રીપ્રદાયિની ॥ ૧૪૭॥

ફલશ્રુતિઃ
ઇતિ તે કથિતો લક્ષ્મી નામસારસ્તવો મયા ।
શ્યામલાયા મહાદેવ્યાઃ સર્વવશ્યપ્રદાયકઃ ॥ ૧૪૮॥

ય ઇમં પઠતે નિત્યં નામસારસ્તવં પરમ્ ।
તસ્ય નશ્યન્તિ પાપાનિ મહાન્ત્યપિ ન સંશયઃ ॥ ૧૪૯॥

ત્રિસન્ધ્યં યઃ પઠેન્નિત્યં વર્ષમેકમતન્દ્રિતઃ ।
સાર્વભૌમો મહીપાલસ્તસ્ય વશ્યો ભવેદ્ધ્રુવમ્ ॥ ૧૫૦॥

મૂલમન્ત્રજપાન્તે યઃ પઠેન્નામસહસ્રકમ્ ।
મન્ત્રસિદ્ધિર્ભવેત્તસ્ય શીઘ્રમેવ વરાનને ॥ ૧૫૧॥

જગત્ત્રયં વશીકૃત્ય સાક્ષાત્કામસમો ભવેત્ ।
દિને દિને દશાવૃત્ત્યા મણ્ડલં યો જપેન્નરઃ ॥ ૧૫૨॥

સચિવઃ સ ભવેદ્દેવિ સાર્વભૌમસ્ય ભૂપતેઃ ।
ષણ્માસં યો જપેન્નિત્યં એકવારં દૃઢવ્રતઃ ॥ ૧૫૩॥

ભવન્તિ તસ્ય ધાન્યાનાં ધનાનાં ચ સમૃદ્ધયઃ ।
ચન્દનં કુઙ્કુમં વાપિ ભસ્મ વા મૃગનાભિકમ્ ॥ ૧૫૪॥

અનેનૈવ ત્રિરાવત્ત્યા નામસારેણ મન્ત્રિતમ્ ।
યો લલાટે ધારયતે તસ્ય વક્ત્રાવલોકનાત્ ॥ ૧૫૫॥

હન્તુમુદ્યતખડ્ગોઽપિ શત્રુર્વશ્યો ભવેદ્ધ્રુવમ્ ।
અનેન નામસારેણ મન્ત્રિતં પ્રાશયેજ્જલમ્ ॥ ૧૫૬॥

માસમાત્રં વરારોહે ગાન્ધર્વનિપુણો ભવેત્ ।
સઙ્ગીતે કવિતાયાં ચ નાસ્તિ તત્સદૃશો ભુવિ ॥ ૧૫૭॥

બ્રહ્મજ્ઞાનમવાપ્નોતિ મોક્ષં ચાપ્યધિગચ્છતિ ।
પ્રીયતે શ્યામલા નિત્યં પ્રીતાઽભીષ્ટં પ્રયચ્છતિ ॥ ૧૫૮॥

॥ ઇતિ સૌભાગ્યલક્ષ્મીકલ્પતાન્તર્ગતે લક્ષ્મીનારાયણસંવાદે
અષ્ટસપ્તિતમે ખણ્ડે શ્રીશ્યામલાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

માતઙ્ગી માતરીશે મધુમથનાસધિતે મહામાયે ।

મોહિનિ મોહપ્રમથિનિ મન્મથમથનપ્રિયે વરાઙ્ગિ માતઙ્ગિ ॥

યતિજન હૃદયનિવાસે વાસવવરદે વરાઙ્ગિ માતઙ્ગિ ।
વીણાવાદ વિનોદિનિ નારદગીતે નમો દેવિ ॥

Proofread by DPD, NA

*shrI shyAmalAsahasranAmastotram*

pdf was typeset on May 14, 2022

Please send corrections to *sanskrit@cheerful.com*